| | | | |
|---|---|---|---|
| नयनम्, | नायनम्, | निनीषणम्, | नेनीयनम्; |
| नीत्वा, | नाययित्वा, | निनीषित्वा, | नेनीयित्वा; |
| प्रणीय, | प्रणाय्य, | प्रणिनीष्य, | प्रणेनीय्य; |
| नायम् २, नीत्वा २, | नायम् २, नाययित्वा २, | निनीषम् २, निनीषित्वा २, | नेनीयम् २; नेनीयित्वा २. |

[1]ना, नेमः,[2] नीरम्.[3]

## (681) "णील वर्णे" (I-भ्वादिः-522. अक. सेट्. पर.)

'वर्णे=वर्णोपलक्षितायां क्रियायाम्। यथा—'श्वेतं नीलति मरकतकान्त्या'। इति क्षीरस्वामी।

नीलकः-लिका, नीलकः-लिका, निनीलिषकः-षिका, नेनीलकः-लिका; प्रणीलिता, नीलः [4]नीली-नीला, इत्यादीनि सर्वाण्यपि रूपाणि भौवादिक-कीलतिवत् (195) ज्ञेयानि।

## (682) "णीव स्थौल्ये" (I-भ्वादिः-566. अक. सेट्. पर.)

प्रणीवकः-विका, नीवकः-विका, निनीविषकः-षिका, नेनीवकः-विका; नीवः, [5]नीविः-नीवी, इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकजीवतिवत् (606) ज्ञेयानि।

---

1. 'नयतेर्डिच' [द. उ. 2.8.] इति ऋप्रत्ययः, स च डिद्वद् भवति। नयतीति ना=मनुष्यः।
2. औणादिके [द. उ. 7-26.] मन्प्रत्यये गुणः। नेमः=अर्धम्।
3. औणादिके [द. उ. 8.31.] रक्प्रत्यये रूपम्। नीरम्=जलम्।
4. 'इगुपध—' (3-1-135) इति कर्तरि कप्रत्यये नीलः इति भवति। स्त्रियाम्, 'जानपदकुण्डगोणस्थलभाजनागकालनील—' (4-1-42) इत्यनेन प्राणिनि ओषधिविशेषे च वाच्ये अनाच्छादने विहितोऽपि ङीष्, 'नीलादोषधौ प्राणिनि च' (वा. 4-1-42) इति वचनात् भवति। अन्यत्र नीला=शाटी। नील्या रक्तेति यावत्।
5. 'इन्' [द. उ. 1-46] इतीन् प्रत्यये, 'कृदिकारादक्तिनः' (ग. सू. 4-1-45) इति ङीष्विकल्पः। 'स्त्रीकटीवस्त्रबन्धेऽपि नीवी परिपणेऽपि च।' इत्यमरः।